१९ गृत्समद (आङ्गिरसः शौनहोत्रः पश्चाद्) भार्गवः शौनकः।इन्द्रः। त्रिष्टुप्

**अपाय्यस्यान्धसो मदाय मनीषिणः सुवानस्य प्रयसः।**
**यस्मिन्निन्द्रः प्रदिवि वावृधान ओको दधे ब्रह्मण्यन्तश्च नरः॥ २.०१९.०१**

यस्मिन्। प्रदिवि- प्रकर्षज्योतिषि रसे। इन्द्रः- परमेश्वरः। वावृधानः- वर्धमानः। ओकः- निवासम्। दधे- कृतवान्। नरः- नेतार उपासकाः। ब्रह्मण्यन्तः- मन्त्रकामा मेधाकामा वा। इन्द्रस्य निवासं कृतवन्तः। मनीषिणः- मेधाविनः। सुवानस्य- निष्पादकस्योपासकस्य। प्रयसः- तर्पकः। प्रीङ् तर्पणे। अन्धस्य- स रसः। मदाय- तृप्त्यै। अपायि- पीतः॥१॥

**अस्य मन्दानो मध्वो वज्रहस्तोऽहिमिन्द्रो अर्णोवृतं वि वृश्चत्।**
**प्र यद्वयो न स्वसराण्यच्छा प्रयांसि च नदीनां चक्रमन्त॥ २.०१९.०२**

अस्य- एतेन। मध्वः- रसेन। मन्दानः- तृप्तः। वज्रहस्तः- वज्रपाणिः। इन्द्रः। अर्णोवृत्रम्- अपां मूलशक्तिधाराणामावारकम्। वि- विशेषेण। वृश्चत्- अच्छिनत्। वयः- पक्षिणः। स्वसराणि- कुलायान्। न- इव। नदीनां प्रयांसि- आपो मूलशक्तिधाराः। च। अच्छ- समुद्रं हृत्समुद्रमभिलक्ष्य। चक्रमन्त- सरन्ति॥२॥

**स माहिन इन्द्रो अर्णो अपां प्रैरयदहिहाच्छा समुद्रम्।**
**अजनयत्सूर्यं विदद्गा अक्तुनाह्नां वयुनानि साधत्॥ २.०१९.०३**

सः- असौ। माहिनः- महात्मा। अहिहा- वृत्रहा। इन्द्रः- परमेश्वरः। अपाम्- मूलशक्तिधाराणाम्। अर्णः- प्रवाहम्। समुद्रम्- अर्णवं हृत्समुद्रम्। अच्छ- अभिलक्ष्य। प्रैरयत्। सूर्यं- आत्मसूर्यम्। अजनयत्- हृदि दीपितवान्। गाः- चिद्रश्मीन्। विदत्- लब्धवान्। अक्तुना- तेजसा। अह्नाम्- दिवसानां दैवप्रज्ञानाम्। वयुनानि- प्रज्ञानानि। साधत्- असाधयत्॥३॥

**सो अप्रतीनि मनवे पुरूणीन्द्रो दाशद्दाशुषे हन्ति वृत्रम्।**

Dr. Rangaji
WEBOLIM

**सद्यो यो नृभ्यो अतसाय्यो भूत्पस्पृधानेभ्यः सूर्यस्य सातौ॥ २.०१९.०४**

सः- असौ। इन्द्रः- परमेश्वरः। मनवे- विवेकाय। मन ज्ञाने। अप्रतीनि- अप्रतिमानि। पुरूणि- प्रभूतानि। दाशुषे- दात्रे। दाशत्- ददाति। वृत्रम्- आवरणम्। हन्ति- बाधितवान्। सद्यः- क्षणेन। यः। पस्पृधानेभ्यः- आकाङ्क्षायुक्तेभ्यः। नृभ्यः- मनुष्येभ्यः। सूर्यस्य- आत्मसूर्यस्य। सातौ- लब्धौ। अतसाय्यः- तत्प्राप्तिहेतुभूतः। भूत्- अभूत्॥४॥

**स सुन्वत इन्द्रः सूर्यमा देवो रिणङ्मर्त्याय स्तवान्।**
**आ यद्रयिं गुहदवद्यमस्मै भरदंशं नैतशो दशस्यन्॥ २.०१९.०५**

सः- असौ। इन्द्रः। देवः- द्योतनशीलः। स्तवान्- स्तुतः सन्। सुन्वतः- रसनिष्पादकाय। मर्त्याय- मनुष्याय। सूर्यं- आत्मसूर्यम्। आ रिणक्ति- अरेचयत्। प्रकटयामासेत्यर्थः। अनात्मनः शरीरादेरात्मनः पृथक्करणमत्रोच्यते। नैतशः- प्राण इव स्थितः। अंशम्- स्वांशमेव। अस्मै- स्वोपासकाय। दशस्यन्- दास्यन्। गुहदवद्यम्- विरहितदोषाम्। रयिम्- दानयोग्यसम्पदम्। आ भरत्- अवहत्॥५॥

**स रन्धयत्सदिवः सारथये शुष्णमशुषं कुयवं कुत्साय।**
**दिवोदासाय नवतिं च नवेन्द्रः पुरो व्यैरच्छम्बरस्य॥ २.०१९.०६**

सः- असाविन्द्रः। सदिवः- विद्वान्। कुत्साय- कर्मशीलाय। कुत्सा एते हर्यश्वाय शूषमिति श्रुतावेवमेव दृश्यते। सारथये- स्वसारथये। अशुषम्- अशोषणीयम्। शुष्णम्- शोषकम्। कुयवम्- दुरन्नं दुर्भोगम्। रन्धयत्- अनाशयत्। दिवोदासाय- देवसेवकाय। इन्द्रः- ईशनाधिदेवता। नवतिं नव- प्रभूतम्। शम्बरस्य- मेघोपलक्षितजडस्य। पुरः- आवरणम्। व्यैरत्- विददार॥६॥

**एवा त इन्द्रोचथमहेम श्रवस्या न त्मना वाजयन्तः।**
**अश्याम तत्साप्तमाशुषाणा ननमो वधरदेवस्य पीयोः॥ २.०१९.०७**

Dr.Ranganji
WEBOLIM

एव- एवम्। ते- तव। इन्द्र- परमेश्वर। त्मना- स्वतः। वाजयन्तः- गतिकामा वयम्। न- सम्प्रति। श्रवस्या- श्रुतिकामनया। उचथम्- मन्त्रम्। अहेम- प्रापयेम। अहि गतौ। आशुषाणाः- अनुभूतिमन्तः। तत्। साप्तम्- भूर्भुवःसुवरादिसप्तभूमिकारसम्। अश्याम- व्याप्नुयाम। अदेवस्य- अन्धकारस्य। पीयोः- हिंसकस्य। वधः- आयुधम्। ननमः- अपातयः ॥७॥

**ए॒वा ते॑ गृत्स॒म॒दाः शू॑र॒ मन्मा॑व॒स्यवो॒ न व॒युना॑नि तक्षुः।**
**ब्र॒ह्म॒ण्यन्त॑ इन्द्र ते॒ नवी॑य॒ इष॒मूर्जं॑ सुक्षि॒तिं सु॒म्नम॑श्युः॥ २.०१९.०८**

एव- एवम्। शूर- समर्थ। ते- तव। मन्म- मननम्। गृत्समदाः- ज्ञानानन्दाः। अवस्यवः- रक्षाकामाः प्रपन्नाः। न- सम्प्रति। वयुनानि- प्रज्ञानानि। तक्षुः- निर्मितवन्तः। ब्रह्मण्यन्तः- मेधायामन्तिकस्थाने। इन्द्र- परमेश्वर। नवीयः- अभिनवस्य। ते- तव। इषम्- एषणाम्। ऊर्जं- प्राणम्। सुक्षितिम्- सुभूमिकाम्। अश्युः- प्राप्नुयुः ॥८॥

**नू॒नं सा ते॒ प्रति॒ वरं॑ जरि॒त्रे दु॑ही॒यदि॑न्द्र॒ दक्षि॑णा म॒घोनी॑।**
**शिक्षा॑ स्तो॒तृभ्यो॒ माति॑ ध॒ग्भगो॑ नो बृ॒हद्व॑देम वि॒दथे॑ सु॒वीराः॑॥ २.०१९.०९**

पूर्वं व्याख्यातम् (२.११.२१) ॥९॥

Dr. Ranganji

WEBOLIM